Gandhi Memorial College Of Education Bantalab Jammu

JOURNAL OF MANUSCRIPT STUDIES

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

JOURNAL OF MANUSCRIPT STUDIES

Vol. XXV Nos. 1 and 2 1984

Editor

Dr. T. BHASKARAN

Joint Editor

Dr. K. VISWESWARI AMMA

Oriental Research Institute and Manuscripts Library

University of Kerala, Kariavattom, Trivandrum

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

Journal of Manuscript Studies

Formerly published under the title "Journal of Kerala University Oriental Research Institute and Manuscripts Library"

Edited, printed and published by Dr. T. Bhaskaran, Director, Oriental Research Institute and Manuscripts Library, for the University of Kerala.

Printed at S B Press, Trivandrum.

Annual subscription Rs. 10/-

Articles and books (two copies each) for review may be sent to the Director.

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu



NEW BUILDING OF THE ORIENTAL RESEARCH INSTITUTE AND MANUSCRIPTS LIBRARY

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CONTENTS

1	Dr. P. Visalakshi	श्रीरामस्तुतिः	5
2	A. Sumangala Bai	विशाखतुलाभारप्रबन्धः	8
3	Dr. K. Vijayan	श्रीनारायणविजयो नाम संस्कृतमहाकाव्यम्	36
4	S. Radhakrishnan Mallassery	Problems in Componential Analysis of Malayalam Nominals	49
5	Dr. E. V. N. Namboodiri	The language of Kaṇṇaśśa works	66
6	Dr. S. G. Moghe	Influence of Someśvara on Caṇḍidāsa	79
7	L. Sulochana Devi	Paramārthasāra of Ādiśeṣa	84
8	Dr. (Miss) M. V. Ramana	Significance of the title of Kāvya in Saṇskrit literary tradition	92
6	Dr. K. Vijayan	Research in Sanskrit	97

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

ŚRĪRĀMASTUTI

Dr. P. Visalakshi

Sanskrit Literature is rich in hymns on personal Gods like Śrīrāma, Śrīkṛṣṇa, Śiva and so on. The usual pattern is to recount the glories of the God by narrating the incidents in his life. Sometimes in addition to invocation there will be a prayer to save the devotee from wordly trouble or even from the shackles of saṁsāra. Śrīrāmastuti conforms to the above description. It is a hymn in praise of Śrīrāma. The metre employed has got a catching rhythm. Laghus and gurus are alternately used in it which gives a wave-like motion to the stanza. The present edition is based on T.M. 880-39. The variant readings in T.M. 880-50 are given as foot-notes. Attempts to trace the details about the author and his date have failed.

श्रीरामस्तुतिः

भक्तभक्तदायिवृत्त पद्मनाभ योगिनां
गुप्तिमुक्तिकर्मतत्परोऽच्युतेन्दिरापते ।
सप्तसप्तिवंशजात रामभद्र दुर्हृदां
रक्तरक्तमार्गणौघ राम पाहि पाहि माम् ।।

पाहि पाहि रामकृष्ण मां रमेश विक्रमै–
मोहिताहित त्रिलोकपाल नाकिनां गते ।
देहि देहि मे सुखं विभो गणेन तेजसा
मोहिताहिमांशुबिंब राम पाहि पाहि माम् ।।

भासुरासुनाथ लोकमातरङ्ग मङ्गला–
वासवासवानुज त्रिलोकभूषण प्रभो ।
भासिचा[1]सितद्युते रघूत्तमो यदूत्तमो–
द्यासि कौसलेय कृष्ण राम पाहि पाहि माम् ।।

1 बासित

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

भिक्षुचक्षुषोर्ज[2]न स्वभावमाधवक्षमा–
पक्षवक्षसीन्द्रवन्द्य लंबमानकौस्तुभ ।
विक्षिपक्षणान्मदीयकन्मषं क्षमापते
कुक्षि[3]रक्षितत्रिलोक राम पाहि पाहि माम् ।।

भीषणोसि वैरिणां विभीषणप्रियोप्य[4]हो
दूषणान्तकश्च मे भवामरेड्य सर्वथा ।
शेषवासलो(लतेव्य?) लुपोप्य शेषलोकवासिहृत्
तो[5]षितो भवाश्च कृष्ण राम पाहि पाहि माम्।।

भु[6]ज्यतामयज्जनस्समेन विष्णुनामुना
युज्यतां च सत्पथेहितैषिणत्वयानिशं ।
सज्यकार्मुकेषुहस्त जानकीपते हि ते
सच्चिदात्मने नमोस्तु राम पाहि पाहि माम् ।।

भूतलादि लोकपालिने भुजङ्गशायिने
वेदवेद्य योगिनां मनःप्रमोददायिने ।
वातभक्षणान्तकध्वजाय विश्वरूपिणे
वासुदेव ते नमोस्तु राम पाहि पाहि माम् ।।

भृत्यवर्गतोषणोत्सुकाय माधवाय ते
मत्स्यकूर्मपोत्रिनारसिंहवामनात्मने ।
नित्य राम राम राम कृष्ण कल्किरूपिणे
सत्यवादिने नमोस्तु राम पाहि पाहि माम् ।।

फेनचूडवन्दिताय केशवाय शार्ङ्गिणे
बाणदोर्वनच्छिदे यदूद्वहाय वेधसे ।
दानवारये दिवाकरान्वयोद्भवाय गी–
र्वाणवन्द्य ते नमोस्तु राम पाहि पाहि माम् ।।

---

2 ज्जन 3 निक्षित 4 प्यसौ 5 तोषतो
6 भुज्यतानयज्जन समेन

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

भैरवाऽशरान्तकाय ते रथाङ्गपाणये
कौरवान्ववायधूमकेतवे मुरारये ।
शौरयेऽम्बुजायतेक्षणाय दुष्टभूभुजां
वैरवेश्मने नमोस्तु राम पाहि पाहि माम् ।।

भोगिनां सुखप्रदोसि ते नमो दयानिधे
योगिनां च यद्यदेव वाञ्छितं ददासि हि ।
भागधेयदो भवाशु मे रमेश भूभुजां
भागधेयहेतुभूत राम पाहि पाहि माम् ।।

(भौ?) भूसुराश्रमेषु धर्मदैवतं हि नित्य दा–
नवासुरालयेऽनित्यदाभिचारदेवता ।
वासुदेव तावकीनवैभवं जयत्यहो
वा[7]सवानुज प्रसीद राम पाहि पाहि माम् ।।

भङ्ककारिणं भवामयस्य भक्तवत्सलं
पङ्कजेक्षणं पयोनिधावहीन्द्रशायिनम् ।
पङ्क्तिकण्ठवैरिणं[8]परं पुमांसमिन्दिरा–
सङ्गमोदितं भजामि राम पाहि पाहि माम् ।।

भस्मलेपनेष्टशङ्करप्रियज्जनार्द्दनं
विस्मनीयविक्रमं त्रिविक्रमं हरिं भजे ।
युष्मदीयपादपङ्कजद्वयं विना विभो
ह्यस्मदीयरक्षणं न राम पाहि पाहि माम् ।।

---

7 वैरशेश्मने नमोस्तु 8 वरं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

VIŚĀKHATULĀBHĀRAPRABANDHA

A. Sumangala Bai

Any event, minor or major, during the reign of a king was used to be celebrated by his court-poets in olden days composing literary pieces, commemorating the incident. The 'Viśākhatulābhāraprabandha' written by A. R. Raja Raja Varma is one of the works so compiled.

In the year 1060 M. E. (1885 A. D.) Viśākham Tirunal (1055-1060/1880-1885 A.D.), the King of Travancore celebrated Tulāpuruṣadāna (weighing his person with something valuable preferably gold and offering it to God or Brahmins). The event was celebrated as a festival. Famous writers of the period compiled poetical works extolling the King on his performing this ceremony. Thus Kerala Varma Valiya Koil Thampuran (the author of the Mahākāvya Viśākhavijaya) wrote Tulābhāraśataka. The creation of Mm Dr. T. Ganapathy Sastri was Tulāpuruṣadāṇakāvya. Elattur Rāmaswami Śāstrikal produced Tulābhāraprabandha. Needless to say, that all these works were presented to the King. This work also was offered as a tribute to the King along with those of the veterans. The King arranged a special function for the presentation of awards to these great writers. A. R. Raja Raja Varma was only a student, 22 years old at that time. He was not invited to the function. He feared that his work was not upto the standard and that might be the reason for his not being invited, a thought which naturally made him disappointed. But one day the King summoned the young writer to his court and congratulated him on his accomplishment. The King gave the writer a pair of diamond ear-rings as prize for his composition. He explained that the delay in making the award was caused by the difficulty in getting the ear-rings from Madras. A.R. was very much pleased and wore with pride those ear-rings till the end of his life. The incident bears testimony to the royal appreciation of the composition. Viśākham Tirunāl himself being very learned it can be presumed that he might have appreciated the intrinsic merit of the work. That A.R. is the author of this work can be

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

gathered from the colophon occurring at its end. The colophon runs as follows:-

रचितो राजराजेन
चरणाम्बुजसेविना ।
श्रीविशाखतुलाभार-
प्रबन्धोयं मुदेस्तु वः ।।

A.R. Rajaraja Varma (1863-1918) was a versatile writer in Malayalam and Sanskrit. He has to his credit many works in those languages. His scholarship has a wide range. He was well-versed in astronomy, grammar, poetics, prosody and a variety of subjects. Most of his works in Sanskrit remain unpublished. The present work also has not been printed before. His works in Malayalam grammar, rhetorics and prosody prepared as graduate and post-graduate level textbooks have become classics. Some of his Sanskrit works are the following:

1. Bhangavilāpa
2. Kādambarīsamgraha
3. Vīṇāṣṭaka
4. Dēvīdaṇḍaka
5. Gairvāṇīvijaya
6. Vimāṇāṣṭaka
7. Mēghōpālambha
8. Pitṛpralāpa
9. Āngalasāmrājya
10. Viṭavibhāvarī
11. Laghupāṇinīya

This work is written in the campu-style where prose and verse are beautifully intermingled. It is divided into two parts namely the former half (पूर्वार्ध) and the latter half (उत्तरार्ध). The former half consists of forty verses and six pieces of prose whereas the latter half contains fiftytwo verses and six passages in prose. According to Ullur S. Parameswara Iyer A.R. has written only 94 stanzas in verse and prose. But Kerala Varma Valiya Koil Thampuran, his teacher and uncle, added six more stanzas to make it a śataka, century of verses. (Kerala Sahitya Caritram Vol. V. p. 805). This seems to be not correct. A Śataka need not necessarily contain exactly 100 verses, it may be more or less since the śataka-form is rather a poetic genre. Further in this book there are only 89 stanzas and 14 pieces of prose whereas the number of stanzas given by Ulloor is 94. Another point to be noted is that from the colophon it can be gathered that it is a prabandha and from the

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

interpersing of prose and verse it is a campu. The work thus being a campu prabandha cannot be a śataka at the same time.

The remark of Ulloor to the effect that Kerala Varma composed six more verses to complete the work of A. R. Rajarája Varma seems to be the outcome of a misunderstanding. This might have arisen from the fact that the transcripts of both the works of Kerala Varma and A. R. are alike entitled Viśākhatulābhāraprabandha. The two transcripts (Nos. 1970 and 1971) got from the Palace Library are with us. In the work of Kerala Varma the exact title of which is Tulābhāraśataka, there are 100 verses, but the last six seem to be a second thought addition. This can be corroborated by the fact that after 94th stanza there is 'Śubhamastu' which is indicative of the ending of the work. After this six more stanzas are given. By replacing one thing for another in the memory Ulloor might have said that Kerala Varma wrote six stanzas to the 94 to make a century of verses to the work of A. R. whereas in truth what Kerala Varma has done was to add six more stanzas to his own work. That the memory of Ulloor has deceived him is amply proved by the fact that all the verses (1, 46, 53 and 72) and one prose passage (No. 1) quoted by Ulloor to show the nature of the work of A. R. is not from Viśākhatulābharaprabandha but from Tulābharasataka' by Valiakoil Thampuran.

The subject of the composition is, as already said the tulāpuruṣadāna performed by Viśākham Tirunal. The work begins with the introduction of the King and the description of the city of Trivandrum where the King ruled. Then the greatness and prowess of the King are brought out in vivid language. The King once thought of doing some meritorious deeds in accordance with tradition to hold aloft the banner of virtue of his family. Then the idea of performing tulāpuruṣadāna struck him. Thereupon the King ordered his minister to make preparations for conducting the ceremony. It was a ritual done by his forbears and without doing it the King felt that he cannot remain content. The minister ordered the officials under him to do the needful. The news spread everywhere in the country at once. The result was the tumultuous noise raised by people eager to take part in the ceremony in various capacities. As the ritual was planned for the month of Vaiśākha the poet finds

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

an occasion to describe the spring season which is quite befitting a festival. The people were caught with eagerness to witness the festival. The things collected for conducting the ceremony are described in this context.

The second part begins with the depiction of people coming to the city to take part in the festival and the tumult raised by them. Then the ceremony begins. The rustic people's childish reactions on coming across the different sights of the city are described with a humorous touch. The arrival of the Brahmins desirous of partaking sumptuous feasts and the heap of eatables are described in clear language. The mountain-like heaps of white rice, the poet observes, raises the suspicion whether the King was going to be weighed with pearls.

The feast of Brahmins and the hurry-burry in connection with the festival become fit subjects for the deft pen of the poet

The king gets ready to perform all the preliminary rituals. First he accepts a preceptor. He observes the vows for the ritual, which gives his face an added glory. He salutes all the deities. On the day appointed for the ceremony the King enters the hall where the balance was placed and where oblations into fire with the recital of mantrās have been made. Having saluted the preceptor, elders and relatives the King gets into the scale to be weighed. Then conches are blown, drums beaten and there arises the sound of "hail, hail." Gifts are distributed profusely among Brahmins. The work ends with the benediction that the King Viṣākha may rule over the earth for a long time.

Assessing the work as a whole, Ulloor has remarked that the work does not rise to the standard set by Kerala Varma. That such an observation has a tinge of prejudice is undoubted because we have already noted that there is some confusion in the mind of Ulloor about the identity of the work and that all the passages quoted by Ulloor as from Viśākhatulābhāraprabandha are really from Tulābhāraśataka. Therefore we have to presume that in his eagerness to place his patron above the young budding poet, ie, A. R., he has unwittingly criticised him.

Besides considering the young age of A. R. one can say that he can be proud of his composition. He is gifted with in-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

born poetic talents. As a student of Fourth Form he wrote an essay on the dictum,—'An honest man is the noblest work of God' -and got the cash award of sixty rupees from Viśākham Tirunal. It is difficult to believe that the Tulābhāraprabandha is the creation of a young budding poet, because it displays the eloquence of a mature and scholarly person. The author has been able to emulate without effort the dictions of Kādambari and Harṣacarita. The diction, the mode of presentation, the mastery over the vocabulary, the apt application of figures of sound and sense and the graphic descriptions make the work very attractive. As an illustration a verse describing the city of Trivandrum may be quoted:

श्रीमत्केरलमण्डलोज्ज्वलशिरोऽलङ्कारलीलाकरमं
श्रीवञ्चिक्षितिपालमूलनगरं श्रीकान्तसंसेवितम् ।
श्यानन्दूरमहो! पुरन्दरपुरी सम्मोदमप्यावहत्
स्यानन्दूरमनिन्दितं पुरवरं जागर्ति सर्वार्त्तिहृत् ।। I. 2

Comparison brought out with the aid of śḷēsa (double meaning) is a peculiarity of Sanskrit ākhyāyikās. A.R. also has skilfully made use of this figure. For example:

उल्लासयन्ती नगरान्तराल–
मुन्निद्रयन्ती कविचित्तपद्मम् ।
उन्मीलयन्ती सुमनः प्रपञ्च–
मुद्घाटयन्ती क्षितिभृन्महत्वम् ।। I· 22

खरादि विविधस्पर्शा
अनन्तस्थानभासुराः ।
ऊष्मसंयोगमहिता
व्यञ्जनौघा विरेजिरे ।। II. 22

can be quoted. To bring out the extra-ordinary qualities possessed by an object under description, of course with exaggeration, the poets often make use of the figure Ullēkha wherein an object is conceived of in different ways by different persons or by one and the same person. For example the following from the description of the city of Trivandrum can be quoted:

CC-0 Agamnigam Digital Preservation Foundation, Chandigarh. Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

महाकुलीनः स्वकुलक्रमाप्ते
सिंहासने सिंहसमो महीन्द्रः
प्रीतिस्सतां चेतसि चेतरेषां
भीतिश्च तेनुर्युगपत्पदं किम् ।। I. 10

यच्च किल नगरवरं नानादेशागतैर्विद्वज्जनविशिष्टामिति विद्यार्थिभिर्वेशवनितानिषेवितामिति विटैः महाराजनिवासमहितामिति महद्भिः पाठशालापरोतमिति पिपठिषुभिः सततसन्निहितमाधवामिति सात्विकैः कौतुकायतनमिति कुतूहलिभिः न्यायशालानिवेश इति नीतिविशारदैश्च निरन्तरं निषेव्यते ।। I. 1

It is to be noted here that this does not exactly fit in with the accepted definition of the figure. Similar deft use of other figures also are there. Anyone reading the book can easily pick them out.

In the use of jingling alliteration also the poet displays a skill of no mean order. For example, take the passage beginning with

अञ्जसा च खञ्जननयनाचरणकञ्जरञ्जनमञ्जीरसञ्जातशिञ्जितातिमञ्जुगुञ्जदलिपुञ्जसमञ्जसकुञ्जमञ्जरीसमर्थितपार्थिवोपदापदार्थसार्थ चरितार्थितोपशल्यः सुमधुर मधु माधुरीभरोपरज्यदीपत्कपायरसोत्तालरसालसालसमुल्फुल्लपल्लवास्वाद समुत्सारित..... I. 5

There are many stanzas in which the beauty of a simile is enhanced by blending svabhāvokti with it. For example:-

तदा वितानाम्बरमाल्यभूषिताः
प्रतीक्षमाणा महितं महं मुहुः ।
लसद्वलीकाः परितोऽथशालिका
विरेजिरे वासकसज्जिका इव ।। I. 39

The apparent contradiction (virōdhābhāsa) brought out by the plurisignificance of word is another trait of the work. For example:-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

निर्व्यापारास्त्वरितमगमस्तस्करा मस्करित्वं
शान्तस्वान्ता अपि भव सुखे सस्पृहा संबभूवुः।
नीत्या नित्यं निखिलसुखदे श्रीविशाखक्षितीन्द्रे
वञ्चिक्षोणीमवति सुमहान् व्यत्ययस्सत्यमासीत् ॥ I. 11

The practice of reproducing the conversation of the people assembling to take part in a festival is a feature followed by the authors of campūs. The Viśakhatulābhāraprabandha also has followed the method. This adds to the flavour of the work.

Thus in the dexterous use of figures of sound and sense, admirable mastery of language, use of humour and the reflection of the state of a section of people the work has risen to a commendable standard.

The present edition of the work is based on a transcript No. T 1970 procured from the Palace Library.

I am thankful to Sri. Madhavan Unni retired Senior Research Officer for the valuable help he has rendered for the preparation of the text of the work. I thank Dr. T. Bhaskaran, Director of the Department, for his help and guidance.

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

तुलाभारप्रबन्धः ।

आनन्दाननिशं दिशन् सुमनसां वृन्दाय मन्देतरां
शक्तिं शिष्टजनेष्टसाधनविधौ साधीयसीं संवहन् ।
भूयाद्भूरिशिलासहस्रविलसत्क्रौञ्चाद्रिवेधक्रियां
सम्यङ्निर्वहणाप्तकीर्तिमहितः श्रीमान् विशाखः श्रियै ।। 1

श्रीमत्केरलमण्डलोज्ज्वलशिरोऽलङ्कारलीलाकरं
श्रीवञ्चिक्षितिपालमूलनगरं श्रीकान्तसंसेवितम् ।
स्यानन्दूरमहो ! पुरन्दरपुरीसम्मोदमत्यावहत्
स्यानन्दूरमनिन्दितं पुरवरं जागर्ति सर्वार्त्तिहृत् ।। 2

श्रीराम क्षितिपाल भक्तिमहिमप्रीतेन दैत्यान्तके–
नैतन्मण्डलपालनाय नियतं प्रत्यालयं प्रेषिताः ।
नूनं तत्करपाञ्चजन्यतनया इत्यादधाना भ्रमं
यस्मिन् सीमशिलाशिरस्सु लिखिता राजन्ति शङ्खव्रजाः।। 3

पौरस्त्यसीमाप्रवहत्स्वकीयपानीयपातिहृदिनी भुजेन ।
जामातुरावास इतीव मोदादालिङ्गनं यस्य करोति सिन्धुः।। 4

स्तम्भोपरि प्रतिनिवेशवशात्सुदूर–
लक्ष्यांशुभिः स्फटिकगोलकदीपिकाभिः ।
सन्ध्यासु तारकित पुष्करमत्सरात्किं
यत्रात्मभूषणविधिं कलयन्ति रथ्याः ।। 5

यस्मिन्नीपन्मलजलपतद्दीपजालानुबिंब–
व्याकीर्णान्तर्ज्जलपरिसरः पद्मतीर्थस्तटाकः ।
स्वैरं तीरे जपरतधियां योगिनां शातकुम्भ–
स्तम्भव्रातैः कृतवृतिरिति भ्रान्तिमन्तर्विधत्ते ।। 6

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

यस्मिन् वञ्चिक्षितीन्द्रप्रचुरवितरणप्रौढिमाकर्ण्य लोकात्
स्वात्माप्येतेन काले निखिलधनलयादर्थिसात्कारमेति ।
निश्चित्य क्षुद्रकायो दितितनयरिपुस्वत्वलाभाय वेगा–
त्संप्राप्तः स्वर्णशैलःकिल लसति सुरेशालये सध्वजेन्द्रः ।। 7

निखिलभुवननाथे नीरजाक्षे विसृज्य
स्वनिलयमधिवासं यत्र कर्तुं प्रवृत्ते ।
उपरिभुवनषट्कं तन्निषेवार्थमाप्तं
परिणतमनणीयो गोपुरत्वेन नूनम् ।। 8

यच्च किल नगरवरं नानादेशागतैर्विद्वज्जनविशिष्टमिति विद्यार्थि–भिर्वेशवनितानिषेवितमिति विटैः महाराजनिवासमहितमिति महद्भिः पाठशाला परीतमिति पिपठिषुभिः, सततसन्निहितमाधवमिति सात्त्विकैः कौतुकायतनमिति कुतूहलिभिः न्यायशालानिवेश इति नीतिविशारदैश्च निरन्तरं निषेव्यते । 1

एतत्तन्नगरमवाप्य दीप्तकान्ति–
र्नीतिज्ञो निजसचिवैस्सहावनीं स्वाम् ।
साम्राज्यश्रियमनपायिनीमवाप्तः
सम्मोदादवति विशाखरामराजः ।। 9

महाकुलीनः स्वकुलक्रमाप्ते
सिंहासने सिंहसमो महीन्द्रः ।
प्रीतिस्सतां चेतसि चेतरेषां
भीतिश्च तेनुर्युगपत्पदं किम् ।। 10

निर्व्यापारास्त्वरितमगमस्तस्करा मस्करित्वं
शान्तस्वान्ता अपि भवसुखे सस्पृहाः संबभूवुः ।
नीत्या नित्यं निखिलसुखदे श्रीविशाखक्षितीन्द्रे
वञ्चिक्षोणीमवति सुमहान् व्यत्ययस्सत्यमासीत् ।। 11

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

किं बहुना

स्यानन्दूरपुरस्पर्धि स्यानन्दूरपुरं भुवि ।
श्रीविशाखसमो भूपः श्रीविशाखमहीश्वरः ।। 12

प्रतीक्षमाणोऽवसरं चिराय
चिन्तेयमेकान्तनिषेदुषोऽस्य ।
लक्ष्मीपतिः स्वैरविलासरङ्गे
लेभे कदाप्यन्तरमन्तरङ्गे ।। 13

अहो बतातिमहती बहुसङ्कट च महीपालना नाम । कतिपयपुत्र-कलत्रमित्रदायादप्रभृति समुदायात्मकस्य पञ्चपजनघटितस्यापि भरणं कुटुम्बस्य महाक्लेश इति बहुशो विलपन्ति गृहमेधिनः।

एवं स्थिते कथमवतरतु नाम स्मृतिपथमपि निखिलभुवननिवासि नानाजनकदम्बैः कुटुम्बशालिनां राज्ञां कृत्यगरिमा । लोके तावत्कस्यचि-त्पुरुषस्य पर्यवस्यति परानुसरणवलेशोऽप्यनुवर्तनेन यस्य कस्यचिन्निज-स्वामिनः-

पृथ्वीपतिनां तु प्रत्युत सदानुवर्ननीयास्सादरमनुरञ्जनीयाश्च निजा एव प्रजाः ।

किंच एवं निखिलनिजसुखसन्ततिमप्यनादृत्य नित्यमाराध्यमाना अपि प्रायेण प्रणयपराङ्मुखाः पुरोभागिनश्च किल जनाः।

किंन ते दशाननपिशाचनिष्कासनतन्त्रमहामान्त्रिकवरे महारथे दाशरथावप्यशङ्कन्त वैशसाङ्कुरम्। कथं नाम मादृशेषु मन्थरायतां रन्ध्र-गवेषणैकपरायणा दृष्टिरेषाम् । को वा जानाति राजानमृते राज्ञामत्युन्नतं कृत्यगौरवम् । अथवा भगवच्चरणारविन्दविन्यस्तसमस्तभराणां कृतो वास्माकमवकाश एवैतादृशाशङ्कानां। तथा च तत्प्रसादादनवरतमनुबध्नी-याद्भावुकमेवास्माकम्। तत्सम्पादनार्थं च तीर्थाटनादीनि सम्यगनुष्ठितानि कर्मजातानि परिपोषयामि, पूर्वाचाराणामनुपालनेन कुलदैवतं धर्ममपि । II

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

इतिप्रवृत्ते मुहुरस्य चित्ते
चिन्तासमुद्रे स्वयमाविरासीत् ।
तरङ्गभङ्गागमनक्रमेण
तदा तुलाभारविधेर्विधित्सा ।। 14

सत्वरमेवामात्यं समस्तकृत्यनित्यजागरूकं निर्जरगुरोरपि नीति-शिक्षणविचक्षणं निखिलगुणगणविलासारामं रामवैष्णवमाहूय एवमाज्ञापयामास वासवो वसुधायाः । III

भवतामिदं विदितमेव तर्कये
ननु मामकीनकुललब्धजन्मभिः ।
अवनीश्वरैरखिलधर्मकर्मठैः
क्रियते तुलापुरुषदानमुत्तमम् ।। 15

तदकुर्वतो हृदयमेतु निर्वृतिं
कथमद्य वज्रिचधरणीपतेर्मम ।
अकृतेषु नाम करणीयवस्तुषु
स्वयमेव चिन्तय कृतार्थता कुतः ।। 16

वितथोऽद्य सेतुसुरनिम्नगास्नवः
कलये ममावितरतस्तुलानरम् ।
बहु वाजपेययजनं द्विजन्मनः
परिमुक्तसान्ध्यविधिसन्ततेरिव ।। 17

तदवश्यमाशु करणीय एव सः
श्रुतिचोदितः क्रतुरतीव पावनः ।
क्षमते न कालहरणं किलातुल-
श्रमसाधनोऽयमपि कर्मभावुकम् ।। 18

तस्मादयं विधिरनन्तर एव शश्वत्
वैशाखमासि विहितो विधिवद्यथा स्यात् ।
व्यग्रस्तथार्हसितरां ननु संविधातु-
मित्यभ्युदीर्य विरराम स रामराजः ।। 19

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

इत्थं पृथ्वीवलारिः पृथुविनयभरप्रह्वमौलावमात्ये
वाचा विन्यस्य सर्वामपि भरणधुरां मानुषोद्योगसाध्याम् ।
भक्त्युद्रेकप्रकामप्रवणनिजशिराश्शौरिपादारविन्दे
दैवायत्तां हृदा च प्रमुदितहृदयः कृत्यशेषानकार्षीत् ।। 20

अमात्योऽपि

महीमहेन्द्रस्य मुखारविन्दा-
न्निष्यन्दिनो वर्णमरन्दबिन्दून् ।
पीयूषपायं परिपीय भूय-
श्चित्ते विनिश्चित्य जगाम कृत्यम् ।। 21

ततश्च नरपतिशासनं शिरसि माल्यमिव शेखरयता सचिवप्रवरेण प्रचोदितेषु तत्तत्कार्यसम्पादनार्थमितस्ततश्चञ्चूर्यमाणेषु कर्मसचिवेषु ।

IV

उल्लासयन्ती नगरान्तराल-
मुन्निद्रयन्ती कविचित्तपद्मम् ।
उन्मीलयन्ती सुमनः प्रपञ्च-
मुद्घाटयन्ती क्षितिभृन्महत्वम् ।। 22

उत्कण्ठयन्ती द्विजलोकमुच्चै-
रुच्चावचा सा पुर उत्पतन्ती ।
उदेष्यदुद्दाम महोष्णरश्मे-
रुषः श्रियं साधु बभार वार्ता ।। 23

अञ्जसा च खञ्जननयनाचरणकञ्जरञ्जनमञ्जीरसञ्जातशिञ्जितातिमञ्जु गुञ्जदलिपुञ्ज समञ्जसकुञ्जमञ्जरीसमर्थितपार्थिवोपदा पदार्थसार्थचरितार्थितोपशल्यः सुमधुर मधु माधुरीभरोपरज्यदीषत्कषायरसोत्तालरसालसालसमुत्फुल्लपल्लवास्वादससुत्सारित कण्ठकौण्ठयकलकण्ठवन्दिवृन्दविहितविविधस्तवस्तोमनिनादमेदुरितपुरोभागः, अभिनवविलसदमलगाङ्गयशकलोपमेयहसितचाम्पेय कुसुम पाथेय समुपयुक्तस्वापतेय परिपूरित बहुकोशजातसमेथितश्रीः, हिमसमयविगम स्वच्छसमुद्गच्छदतुच्छकान्तिशिशिरच्छविच्छलसितच्छ त्रनिर्गच्छदच्छाच्छतर-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

छायाच्छविच्छुरितप्रच्छाहितनिखिलतेजोऽन्तरः, प्रमुदिताशोकमुख निज-परिवारपरीतपार्श्वः, क्वचिदपि कदाचिदपि निरर्गलमार्गं मलयानिलनामानमात्मनः पुष्यरथमारुह्य निखिलार्णवमेखलाविस्तीर्णमर्णवमत्यवतीर्णमभ्यर्णगतोत्सवोदन्तं कर्णाकर्णिकयाऽऽकर्ण्य तूर्णमेव निर्वर्णनेन पूर्णयितुकाम इव समुदीर्णकौतूहलममन्दानन्दतुन्दिलो मन्दं मन्दमवततार नगराभ्यन्तरमनन्तवैभवरतिकान्तवोरसामन्तो वसन्तः । V

अथ मधुरमधूलोमञ्जुलाशान्तरालैः
अनुवनमनिमीलन्मल्लिकाबालवल्ली ।
धृतनटनविलासैर्वासरेराविरासे 24

.....

लोकावलोकनकुतूहलतुन्दिलो यः
स्वैरं चचार वसुधामखिलामखिन्नः ।
सोऽयं तुषारपथिकः पथि कोकिलौघ-
मालोकयन्निव वृते स्वनिकेतनाय ।। 25

दिशि दिशि विसृजन्ती भृङ्गमालाकटाक्षा-
नमलकमलहासा कोकिलालापरम्या।
शिशिरविगमलक्ष्मीस्तत्क्षणेनैव तेने
मदनकदनदूनं मानसं मानवानाम ।। 26

अनुपतन्मधु पालिगलोद्गलत्
कलकलारवमेलनभञ्जुलः ।
परिमलः परमामकरोन्मुदं
समुचितं सुरभौ स्वयमागते ।। 27

मालेयगन्धोद्वहनश्रमात्किम्
मन्दायमानो मधुमातरिश्वा ।
कुञ्जेषु कूजत्पिककोमलेषु
विश्रम्य विश्रम्य समाजगाम ।। 28

CC-0 Agamnigam Digital Preservation Foundation Chandigarh.Funding by IKS-MoE-2023 Grant

Gandhi Memorial College Of Education Bantalab Jammu

आदधे समधिकां चमत्कृतिं
मञ्जुले रसिकलोकरञ्जके ।
दोषवर्जितपदार्थसार्थके
भासुरेऽपि कविकल्पितध्वनिः ।। 29

तत्रेष्टशिष्यपरपुष्टमुखोपदिष्ट-
वर्त्मा चिरन्तरसुहृद्विहितातिथेयः ।
सोऽयं मधुर्नगरकान्तिदिदृक्षयेव
स्वैरं चचार मलयानिलदत्तहस्तः ।। 30

प्रत्यासन्नमहोत्सवस्य विधिवत्
सम्पादनायोद्यता
भृत्यास्ते मधुमारुतेन नियतं
नालोकिता भूपतेः।
आदिष्टो निजशासनस्थितिमुषा-
हर्तुं त्रिलोकीपते-
र्मारस्यानुचरोऽन्यथा कथमयं
मन्दोऽभविष्यत्तथा ।। 31

एवं क्रमेण समेधितमदनवेदनाप्रमाणे विजृम्भमाणे मधुमासे प्रत्यासीदति च शनैः शनैरवनीवलारितुल्याभारोत्सवे चिरविरहविज्वलप्रमदाजनप्रतिदिनप्रतीक्ष्यमाणप्रत्यागमनदिनानां पथिकलोकानां महोत्सवावलोकनकुतूहलाकुलितचेतसां पुरौकसामपि हृदयेषु समाँशमंशित इव रराज रण-रणिकाख्यो विकारः ।। VI

प्रकटचटच्चटधावप्रचुरा
प्रपदीननिष्प्रवाणि पटाः ।
आलक्षिपताध्यक्षाः
शालानिर्मापणोद्यतास्सद्यः ।। 32

इहार्थशाला इह भुक्तिशाला
इतीरयन्तो भृतकम्पितास्ते ।
प्रदक्षिणप्रक्रमणं वितेनुर-
निच्छवोऽप्यच्युतमन्दिरस्य ।। 33

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

वेतण्डमत्र रदलग्नतरुप्रकाण्ड-
माहिण्डमानमतिचण्डरयं निरीक्ष्य ।
सस्मार विस्मितविरिञ्चविलोक्यमानां
नारायणो निजवराहविहारचेष्टाम् ।। 34

मुहुर्मुदाशेषसमाहृता सा
साधूपदेशैरुचितैः प्रक्लृप्ताः ।
अदीर्घसूत्रोत्तमसूत्रकार-
कृतिर्विरेजे बहुधा तुलार्था ।। 35

अम्बुजाक्षालयासन्नमवनीतलमञ्जसा ।
अनेकशालिकाकीर्णमसूर्यपश्यमाबभौ ।। 36

तत्रोत्सवार्थैर्भरितां पदार्थैः
शालां विशालामवलोक्य लोकः ।
तत्संज्ञितस्याभवदापणस्य
नूनं स्थलव्यत्यय इत्यमंस्त ।। 37

तदा वितानाम्बरमाल्यभूषिताः
प्रतीक्षमाणामहितं महं मुहुः ।
लसद्वलीकाः परितोऽथ शालिकाः
विरेजिरे वासकसज्जिका इव ।। 38

प्रथितविभवः पृथ्व्यां प्रत्याससाद यथा यथा
मह इह महीजानेर्माहाकुलस्य तथा तथा ।
अहमहमिका कृत्ये कृत्ये नृणामधिकारिणां
कुतुकलहरी लोकस्यापि क्रमादुपचिक्यतुः ।। 39

इति श्रीविशाखतुलाभारप्रबन्धे
पूर्वभागः ।।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

अथ धरणीसुरेन्द्रा वर्णितं किवदन्त्यां
मधुरममुमुदन्तं तूर्णमाकर्णयन्तः ।
सरणिमनुसरन्तस्स्वां धनायोपदिष्टा
पुरमिदमुपयान्ति स्माशनायासहायाः ।। 1

हुंकारैः शिबिकाभृतां प्रतिमुहु-
स्सोच्छ्वासमाम्रेडितै-
र्लोकानां गलहस्तयन्निव बलात्
पाप्मानमल्पेतरम् ।
कान्तिं कामपि बिभ्रदद्भुततप-
स्संभारसंभावितां
सम्प्राप्तो वसुधसुधाशनजनो
माहाकुलीनः पुनः ।। 2

तदनु महोत्सवावलोकनकुतूहलसमाक्रान्तस्वान्ततया सत्वरसमागमत्वरैर्निजसृष्टिपाटवं प्रकटयितुकामेन कमलयोनिनैकत्र पुञ्जीकृतैरिव नानाजनपदनिवासिविविधजनसमुदायैस्सुमुदितैस्समावृते स्यानन्दूरनगरे क्वचित् "कियद्दूरान्तरितमितः कौतुकायतनं, का वा तद्गामिनी सरणिः अद्यैवाभिलषामोऽस्माकं तत्रत्य विविधविस्मयनीयवस्तुसामग्रीसमालोकनेन सम्पादयितुमक्षिसाफल्यम्" इत्याद्यत्यादरेण जनदर्शनमनुयुञ्जानैरर्भककुलैः, एकत्र "कस्मिन्देशे प्रतिष्ठितः सविटलोकतापसतपस्समाधितपोवनायितः शशिवदनाजनचरणनलिनविन्यासधन्यसीमावेशवाटः, कुत्र च लभ्यन्ते शंभल्यः पीठमर्दकाश्चे" ति गवेषणपरायणैस्तरुणगणैः अन्यत्र "हन्त कष्टं विनष्टो ममावष्टम्भयष्टिः कथमद्य गच्छाम्यच्युतालयमाराधयितुं भगवन्तमनन्तशायिनमि" त्यादि विविधविलापवाचालैरितस्ततश्चलद्भिरस्थितचरणैः स्थविरनिकरैः, परत्र "क इदानीं सभाध्यक्षो भवितुमर्हति कीदृशो वा भवेत् सम्भावनाक्रमः" इति समाजगमनात्पूर्वमेव निभृतमन्योन्यं विवदमानैरन्तर्वाणिभिः, इतरत्र असकृन्निवेदितोत्सवावसानदिनैरपि "कति वासरस्थायी महोत्सवः उत मासपर्यवसायी आहोस्विद्वत्सरपर्यवसायी" इति प्रतिमुहुः पृच्छद्भिरुदरंभरिभिः "अपरत्र किं सुवर्णमेव वितीर्यते उत कलधौतमपि किमस्ति प्रतिदिनं

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

।तग्रहः" इति ज्ञातुमतिश्रद्धालुभिर्गृहीतधनुभिश्च प्रतिरथ्यमुत्थाप्यमानो दिगन्तदन्तिवरश्रवणोदरविदारणविचक्षणस्तत्क्षणमुच्चैरुच्चचार कश्चन महान् कोलाहलः । प्रावर्तत च त्वरितमेव समस्तलोकोत्कलिका बला कृष्ट इव विष्टपत्रितयाभीष्टसम्पादनपारिजातमहीरुहो महोत्सवः ।। 1

प्रक्रान्तेऽथ महोत्सवे प्रतिमुहुः
प्रत्यग्रजाग्रत्स्वपि
स्वान्तोन्मेषमहौषधेषु बहुषु
श्राव्येषु दृश्येषु च ।
चक्रे पौरजनस्य चेतसि तदा
सर्वोत्तरं कौतुकं
ग्रामेभ्योऽभिनवं समागतवता-
मज्ञानजं चापलम् ।। 3

वाचालं गलकिङ्किणीकलकलै-
रुष्णो प्रदीपज्वलत्
पार्श्वे सञ्चरमाणमन्धतमसै-
नोरन्ध्रया रथ्यया ।
दृष्ट्वैकं शकटं तदा "बत समे-
त्याधूर्णयन्नक्षिणी
घण्डाकर्णपिशाचरा"डिति भिया
चुक्रोश भीरुर्नरः ।। 4

पाञ्चालिकां सकलकालनिवेदनार्था
सङ्घट्टनाय मुहुरत्र विदारितायाम् ।
आलोकयन्नथ परः "क्षुधितोऽद्य हन्त
प्रासादपाल" इति कारुणिकश्शुशोच ।। 5

सर्वमितं नृपगृहप्रतिहारपाल-
मालोकयन्नतिकुतूहलवानथान्यः ।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

"भद्र त्वया कथममुत्र तनुत्रमध्ये
ब्रूहि प्रविष्ट"मिति विस्मयवानवादीत् ।। 6

वेलाविज्ञापनाय क्षितिपतिसदन-
द्वारपालैरभीक्ष्णं
घण्टानां घट्टितानां घणघणरणितं
तत्र तारं निशम्य ।
गण्यन्ते किं न्वमीभिर्नरपतिचरिता-
स्ते मुहूर्ते मुहूर्ते
धर्मा" इत्यन्वयुङ्क्त स्वसखमुपगतं
कश्चिदन्यो विपश्चित् ।। 7

तदानीं किलावनीसुरसमाजैस्समागतैस्तत्र चिरकालोपचीयमानमु-ग्रतरदुर्गतभावावग्रहग्रस्ततया प्रतिदिनसमेधमानभीष्मोष्मदुष्प्रधर्षमखिल-धस्मरं तत्क्षण एवाशुशुक्षणिमौदर्यं निर्वापयितुमनवरतधारेण पायसरसा-सारेणाकाङ्क्षमाणैः प्रभातप्रायायामेव विभावर्यामवबुद्धय निर्वर्त्य च सत्वरमेव प्रात्यूषिकनित्यकृत्यसन्तति समासादितसादरनरलोकपुरन्दरा-धिकारिजनपरिपूरितपरिसरा पद्मिनीव पयस्सूपशोभिता प्रभातवेलेव द्विजचक्राह्लादिनी विभाकरमण्डललक्ष्मीरिव विलसत्परिवेषका पूर्णिमेव सकलकलद्विजराजविराजिता अद्रितटीव शर्कराराशिरमणीया शिव-भक्तबाहुयष्टिरिव अतिगुरु च रुद्राक्षोत्तमबीजपुञ्जेन रञ्जिता मन्दा-किनीव धवलशोभना दिवि देदीप्यमाना राजसभेव सदा मोदकरसभाजन-भासिता वालुकापरिलसितोपशल्यापि न वालुकाकीर्णाभ्यर्णभूमिर्भुक्ति-शाला । II

त्रिलोकीविख्यातैर्मुहुरशनसंभारविभवैः
श्रुतैरेते शश्वद्विहितनवकर्णामृतरसाः ।
रसज्ञायाः पूर्वं नयनयुगपिप्रीणयिषया
किमु भ्रेमुर्विप्रास्तदनु परितो भुक्तिसदनम् ।। 8

सम्यग्विनीतैरवनोमधोन-
स्सम्मानितास्ते पुरुषैर्विचेरुः ।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

पुरस्फुरज्जेमनदर्शनोत्थ-
जिह्वाजलक्षालितवक्त्रगर्माः ।। 9

तेषां सुधाकिरणशेखरशैलशृंग-
भङ्गो मलिम्लुचरुचिः पुरतोऽन्नराशिः ।
शङ्काङ्कुरं हृदि तदांकुरयांचकार
किन्तोलनं नरपतेरिह मुक्तयेति ।। 10

श्रीमन्तः क्षणमास्यतामिह जवात्
सर्वेऽपि दर्वीकराः
प्राप्तारः परिवेषका इति गिरं
भीतानमून् भूसुरान् ।
अध्यक्षास्समपेक्ष्य तत्र तरसा-
श्वस्तान्वितेनुः पुनः
का भीतिर्भवतां नरेन्द्रपुरुषे-
ष्वस्मासु जाग्रत्स्विति ।। 11

अचिरेण च ।

आसन्नजेमनासार-
पिशुनस्तनितायितः ।
कदलीदलविन्यास-
निस्वनस्तत्र शुश्रुवे ।। 12

तदनु विनयावनतकन्धरैर्वसुन्धरा पुरन्दराधिकारिभिस्सादरं निवेदिताशनावसरागमनेषु अहंपूर्विकयागत्य तत्र तत्र गृहीतासनेषु अचिरोपनीतमयातयाममृतसमानमोदनं अतिव्यसनितया "अर्हतोदमपहर्तुं कोऽपि न गृध्नुः" इति बुद्धयेव परिषेचनपानीयपरिखया परिवेष्टय कालविलम्बासह नत्वेऽपि आचारपरतन्त्रतया अपोशानविधानाय गृहीतचुलुकेषु भूसुरेषु सा भुक्तिशाला ।। III

पल्वलाय नलिनीदलावली-
केलिलोलकलहंसपालये ।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

ईषदुन्मिषितकुड्मलालये
प्रत्यगर्जदुषसार्जितश्रिये ।। 13

मोदान्मुहुर्मोदकभेदखादने
क्षोणीसुरैश्शष्कुलनिष्कुलाकृतौ ।
उड्डामरे लड्डुकपिण्डखण्डने
तैर्व्यापृतं पर्पटपाटनेऽपि च ।। 14

कैलासशैलगलितोपलजालतुल्यान्
हैयङ्गवीनकबलानसकृद्गिलद्भ्यः ।
आभीरचोरणचणःक्षणमम्बुजाक्षो-
ऽप्यभ्यर्णभाग्ध्रुवमसूयितवानमीभ्यः ।। 15

कलुषदूषितमाशु विशोधयन्
भुवनमेष महीदिविषद्गणः ।
ध्रुवमथोदधि चूषणमातनोत्
कलशयोनिमुनेर्विजिगीषया ।। 16

अहो महीयान्महदाश्रयस्य
दुरूह एव प्रथितः प्रभावः ।
यतोऽग्रतो जाग्रत एव शौरे-
र्नृपाश्रयान् कंसगणोऽत्र रेजे ।। 17

मध्ये मध्ये शर्करासैकताली-
माविभ्राणा तण्डुलस्थूलमुक्ता
पङ्क्तौ पङ्क्तौ पायसौघेन क्लृप्ता
शाखाजालैः प्रावहत्ताम्रपर्णी ।। 18

नागाग्रणो नव्यगुणप्रकाण्डै-
र्मोदेन मोचाफलमन्थदण्डैः ।
अवन्ध्यसारं परमाणुसिन्धुं
वसुन्धरा निर्जरसो ममन्थुः ।। 19

नूनं तदा तत्क्षणभुज्यमान-
नानाविधव्यञ्जनमेलनेन ।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

सजन्धि मध्ये द्विजगायकानां
गीतौ स्वराः प्रस्फुटतामवापुः ।। 20

अथोपकण्ठं गमितेऽप्यमीभि-
रलभ्यलंभावसुखं न भक्ते ।
कुक्षिभरीणां किल भोज्यजात-
मीदृक्षमुद्दीपयते बुभुक्षाम् ।। 21

मोदेन तेमनगणस्य गुणान् गृणत्सु
तत्राग्रजन्मसु मनांस्यभजद्गुणानाम् ।
विद्वत्सदस्सु विबुधैरभिवन्द्यमाने
काव्ये निजे कवयतामिव कोऽपि हर्षः ।। 22

अदतामतिमोदमोदनौघं
वदनेभ्यो वसुधासुधाशनानाम् ।
उदगादुपशाम्यतस्तदानीं
उदराग्नेरिव सीत्कृतिप्रणादः ।। 23

इत्येकत्र महीसुरोदरमहाम्भोराशिसम्पूरणे
बभ्राजे सुरसिन्धुविभ्रममरं विभ्रत्स भुक्त्युत्सवः ।
तावत्सूरिसदस्सुरेश्वरसभाशोभावती भारती
शैलूषीशुभरङ्गभङ्गिममनागङ्गीचकारान्यतः ।। 24

निश्शेषतोषितमनोषिनिषेव्यमाणा
सा वैदुषीकपिदृषत्परिषत्प्रहर्षम् ।
चक्रे चिरं चुलुकिताखिलशास्त्रसिन्धोः
श्रीमद्विशाखवसुधातलवासवस्य ।। 25

हन्त ! तदानीमवनीजाने-
र्भोजनशाले द्विजवाचाले ।
कर्मसमानं पुनरास्थाने
चित्रमिहाभूद्भयत्रापि ।। 26

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

खरादि[1] विविधस्पर्शा
अनन्तस्थानभासुराः ।
ऊष्मसंयोगमहिता
व्यञ्जनौघा विरेजिरे ।। 27

भोजनाङ्कानुबन्धेऽपि[2] गुणो नाऽयाति हा कथम् ।
इत्थमक्षमया कश्चित्कथयामास कौतुकी ।। 28

पङ्क्ताविह[3] ब्रह्मपरायणायाम्
किं विस्मृतं व्यासविनिर्मितायाम् ।

---

1 खरादीतिः– भुक्तिशालापक्षे खरादि विविधस्पर्शाः खरमृदुलादि नानाविध स्पर्शविशिष्टाः अनन्तस्थानभासुराः बहुषु स्थानभेदेषु प्रतिष्ठिताः ऊष्मसंयोगमहिताः उष्णत्व सम्बन्धात् स्वादवः व्यञ्जनौघाः तेमनजालानि विरेजिरे । सभापक्षे-खरातिखरमृदु घोषादि संज्ञक वर्गाक्षरसहिताः, न अनन्तस्थाः, अन्तस्थ-सहिताः अन्तस्था य, र, ल, वाः । ऊष्मभिः श, ष, स, हैः, संयोगैश्च महिताः व्यञ्जनानां हलां औघाः ।

2 "भोजनेति"– भुक्तिपक्षे–भोजनांकस्य भुक्तिचिह्नस्य गुण मासूदः परिवेषक इति यावत् । पूर्वलब्धं सर्वमपि जेमनां–भुक्तम् । इच्छामि च पुनरपि भोक्तुम्, तत्कथम् । भोज्यमाहर्तुगतः परिवेषको विलम्बत इति कश्चिदक्षमी कुक्षिभरिश्चुक्रोशेति भावः ।। अन्यत्र भो हे जन ! अवज्ञा सूचिकेयं संबुद्धिः, अङ्कानुबन्धेऽपि ङकार ककार रुपयो व्याकरण प्रसिद्धयो रनुबन्धयोः इतोः अभावेऽपि गुणः परिभाषितः अदेङोरन्यतरः । किङ्ति चेत्येव हि गुणनिषेधः प्रकृते च तस्य नावकाशः । तत्कथं गुणाभावः इति भावः ।

3 पङ्क्ताविति ।। भुक्तिपक्षे ।। ब्रह्मात्राह्मणः, व्यासैः खण्डैः पदक्रमस्य चरणविन्यासस्य अध्यक्षः पौरोगवः । अस्यां पङ्क्तौ कथं परिवेष्टुं भवता विस्मृतमिति पौरोगवः कञ्चित् परिवेषकमपृच्छदिति भावः । अन्यत्र ब्रह्म वेदान्तप्रतिपाद्यं वस्तु । व्यासः पाराशरिः । पदक्रमयोः उपन्यसनं उपन्यासः, अध्यक्षः सभाध्यक्षः ।। 29

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

पदक्रमोपन्यसनं त्वयेति
श्रुता तदाध्यक्षजनस्य वाणी ।। 29

द्राक्षादिपाकेन विनापि विद्वन्
सर्वं समीचीनमतः किमस्य ।
फलं वद स्वोक्तिगौरवेणे-
त्यपृच्छदेकस्सविधस्थमन्यम् ।। 30

नाद्रियतेऽन्नंभट्टः
कस्मादिति पृष्ठ ऊचेऽथ ।
हे न्यायज्ञा अस्मा-
दधिकबलानेवमानयामीति ।। 31

साहसिकत्वमहो ! ते
तत्र रसास्वाद भेद सद्भावे
ननु कथमापादयसौ गौरव
दोषं मुधेति सोऽप्यूचे ।। 32

इत्थं जनान् भिन्नरुचीन् स्वभावा-
दिच्छानुरूपैस्सुखयन् विनोदैः ।
विश्वंभराजम्भरिपोर्जजृम्भे
तावत्तुलादानमहोत्सवोऽयम् ।। 33

---

4 अन्नमितिभट्टः कस्मादन्नं नाद्रियते इति पृष्टः कश्चिदूचेयथा । हे न्यायज्ञाः अहंअस्मादन्नात्–अन्नापेक्षयेत्यर्थः । दधि कबळानेवमानया-मीति । अन्यत्र अन्नंभट्टः तत्संज्ञितो नैयायिकः कथं नाद्रियते–कर्मणि लट् । भवतेति शेषः । अस्मात् न्यायज्ञात् अधिकबलान् अधिक बुद्धि-शक्तिशालिनः ।।

5 द्राक्षेति—भुक्तिपक्षे द्राक्षादि सर्वं पाकेन विनापि समीचीनम् । अन्यत्र द्राक्षादिपाकेन द्राक्षाक्षीरादि परिभाषित पाकेन विनापि सर्वं समीचीनम् । काव्ये सर्वं साधु ।। 31

6 साहसिकेति—एकत्र रसस्य मधुरादेरास्वादस्य च । अन्यत्र । रसास्वादस्य–शृङ्गारादि बोधस्य ।। रसगम्भीरिमा पाक इत्युक्तत्वात् ।।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

महाराजोऽपि तावदखिलागमपारदृश्वा वैश्वानर इव विकस्वर-कान्तिस्तत्क्षणारभ्यमाणमहोत्सवसम्पादित स्वस्वचित्तानुकूल तत्तन्मनो-विनोदनोपायोपलब्धि समधिक विकासीमानस नानाजन निरन्तरवितीर्यमाण बहुविधाशीराशि सम्पर्कसविशेष रमणीय राजलक्ष्मी समाश्लिष्यमाण सकलावयवसम्मान्यसम्यगादर स्नेह बहुमान पुरस्सरं सर्वान् अपि सम्बन्धिनस्समागतान् अर्हयित्वा यथार्हमितरानपि जनान् जनार्दनचरण पङ्केरुह पर्यन्तसमर्पित स्वान्तो यथाक्रममुपाक्रमत निर्वर्तयितुं सर्वमेव धर्मानुशासन समाम्नातं कर्मजातम् IV

अथावृणीतागमसारवेदय-
स्सदा सदाचारपर गुरं नृपः ।
स्वयं समुन्मूलयितुं तमः क्षमो-
प्युपेक्षते प्रातरनूरुमर्यमा ।। 34

दीनपालनमहाव्रते दृढे
दीक्षितोऽपि सततं स भूपतिः ।
अन्वतिष्ठदथ सुष्ठु निष्ठुरं
यज्ञदीक्षणविधिं विचक्षणः ।। 35

रोहिणीरमणकान्तिधोरणी-
रामणीयक तृणीकृतिक्षमम् ।
आप कामपि मुखं महीक्षितो
दीक्षितस्य सुषमामनोपमाम् ।। 36

आसक्तिमस्य कृषितन्त्रकलासु राज्ञो
विज्ञाय किन्तु स परेङ्गितवित्पुरोधाः ।
पात्रेषु तत्र कलधौतविनिर्मितेषु
बीजानि धान्यनवकस्य नवान्यवाप्सीत् ।। 37

ऋत्विग्भिरुत्तमगुणैस्तदनूपहूता
स्सप्तापि लोकजननीरिह सप्ततन्तौ
देवान् जनार्दनपिनाकि विनायकांश्च
भक्त्या ननाम नरपालकुलावतंसः ।। 38

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

अनन्तरमनन्तरायमेवमुपक्रान्ते सप्ततन्तौ सन्तत सन्तन्यमानहवन-समर्पित सर्पिर्निष्पादित बहुलपरिमल परिपूरितदशदिशावकाशे सर्व-गीर्वाणघ्राणतर्पणे प्रसर्पति सकलकलिकलमषनिश्शेषपेषण समयसमासत्ति सूचक धूमकेतौ क्रतुधूमकेतु धूमे परितः प्रतिष्ठित महोन्नत केतन विततिलम्बित वातपोतानवरत चलित पताकानिकरांगुलीविलास संज्ञया यज्ञह-विरास्वादनाय समाह्वयति हरिहयप्रमुखां बर्हिर्मुखमण्डलीं तुलामण्डपे गभीरमधुरतरं मुखरित रोदोविवरं मुहुर्मुहुर्मूर्च्छति मङ्गलार्थमाध्माय-मानशङ्खनिध्वाने तत्तदमर्त्थ सार्वभौम सपर्या पर्याकुलचित्तेषु ऋत्विक् सत्तमेषु अन्तरान्तरासीन पटुपाठकजनारभ्यमाण पुराण पारायण निनाद विमिश्रितैः श्रुतिघोषैः श्रोत्रामृतं विकिरति श्रोत्रियकुले च भुवनत्रय दुखापमवाप किमपि कामिनीयकमतिमात्र पवित्रा सा सत्रशाला ।। V

उग्दातृगीतमिह सामसमन्ततोऽपि
श्रुत्वा बुधाविदधुरोक्षणमन्तरीक्षे ।
श्रीजानिकेतन निकेतनतामुपेत-
श्चैतन्य मेत्य डयते गरुडः किलेति ।। 39

इति मुदितमना मनीषियुक्तः
श्रुतिविहिताभिरतन्द्रितः क्रियाभिः ।
क्षितिपतिरतिवाहयाञ्चकार
क्षणमिव सप्त दिनानि दीनबन्धुः ।। 40

अज्ञातसीम्ना जगतान्त्रयाणा-
मामोदभूम्ना सममाजगाम ।
मेध्योभृशं मध्यम लोकपाल-
मौलेस्तुलारोहणवासरोऽपि 41

श्रीविशाखमहीपतिरपि प्रभातोन्मुखायां विभावर्यां रजनि जागर-णजातश्रमालसतयेव मलीमसवपुषि मन्दत्विषि शनैश्शनैरवतरति चरम-गिरिशिखरं शिशिरकरे प्रसभोद्घाटित कमलकोशसम्पुटसम्पादित सौरभ-सम्पत्संभाविते प्रचलति प्राभातिके प्रभञ्जनपोते तत इतः प्रकीर्णतार-कानिकराबकरमंवरचत्वरादचिरोदित्वरतरणिकिरणनिकुरुम्ब सम्मा-

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

जनीमुखेनावमार्जयन्त्यां प्रभातलक्ष्म्यां महोत्सवनिर्वहणवैयग्र्यसमाकुल-नगरवासिजनकोलाहलमखिलहरिदन्तरघूर्णमानमाकर्ण्य कुतोऽयमित्यव-धारयितुं प्रथमप्रहितेनेव निजसुतेनारुणेनालंकृतपुरोभागे समारुरुक्षति साक्षादन्तरीक्षं क्रमेण कर्मसाक्षिणि साधुनिर्वर्तित स्नानसन्ध्योपासनमुखा-हर्मुखकृत्यः प्रतिनवनिर्मापिताखिलकनकाकल्पामोचनप्रकल्पितानल्पका-न्तिरागत्य दैत्यारिमन्दिरं प्रदक्षिणीकृत्य च पंकजेक्षणं प्रविवेशसविशेष विहितवितानविततिसमेधित सुषमं प्रदक्षिणप्रसारि होमधूममण्डल मण्डितं तुलामण्डपम् ।। VI

तत्राभ्यवन्दत पुरोधसमध्वरान्ते
गोत्रापतिः स्थविरबन्धुजनञ्च भक्त्या ।
वृन्दारकारिविजये विबुधर्षिवृन्द-
मिन्द्रं च वामनतनुस्स पुरेव शौरिः ।। 42

कुतुकाकुलचेतसां जनाना-
मतुलामोदझरोनिमज्जनाय ।
स तुलामचलां बलारिमौलिः
क्रतुपूतामधिरोहति स्म धीरः ।। 43

नेदुश्शंखास्तदानीं मृदुमृदु जुघूपु-
र्डिण्डिमाश्चण्डनादम्
तारं तूर्याः प्रणेदुर्जयजय निनदा-
श्चुक्षुभुस्सर्वदिक्षु ।
उच्चैरुच्चैरुरुच्शाटित निखिलरवं
मंगलोलूलुघोषाः ।
किं वा भूयोभिरुक्तैर्बधिरितभुवनः
कोऽपि कोलाहलोऽभूत् ।। 44

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

भूयो भूयो भुवनमहितैर्भूरिभिर्भूरिभारै–
स्तूर्णं पूर्णं विदधति तुलासम्पुटं बन्धुवर्गे ।
वेदीमेतां निजदिशि तदा पालयन् दिक्पतीनाम् ।
मध्यस्थायी शिथिलित पृथु श्रीमदः श्रीद आसीत् ।। 45

पूज्यैस्तुलारोहण साहसिक्य–
संरम्भ एवं परिणंस्यतीति ।
जवेन जम्बूसरिदम्बुचुम्बि
जम्बालपिण्डोऽयमधः पपात ।। 46

क्षितिभृदऽवभृथे वितन्यमाने
प्रतिनवया व्यलसत् श्रिया कयापि ।
निजतनुकान्तिजितस्य हेमराशे–
रपहृतयेव तदास्यवर्णलक्ष्म्या ।। 47

तदानीमानन्दप्रसरजलधिप्लावितजने
समाप्तेऽस्मिन् सम्यङ्निखिल मखमुख्ये यजने ।
विशामीशस्यासीत् प्रमदलहरी कापि महती
मनस्साधूनां हि स्वकृतसुकृतैरेव रमते । 48

नृपालक बलाहकस्तदनु दीनतादूनित–
द्विजातिवरचातक प्रकरनूतनप्रीतये ।
कणत्कनकरूपिकानिकर रूपिकामादरा–
दुदारकरकावलीमकिरदाकरः श्रेयसाम् ।। 49

आरूढे तमसां निहन्तरि तुलां देवे तदा भास्वति
स्फीतां काञ्चनवृष्टिमाकलयता व्यस्मायि लोकेन यत् ।
जानीमो न निदानमत्र कमपि प्रीत्याकुलेनाऽथवा ।
देशोऽयं किल केरलाभिध इति प्रायो भवेद्विस्मृतम् ।। 50

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

इति जगति जनानां हर्षपीयूषवर्षं
विदधदवनिपालः श्रीतुलाभारलक्ष्म्या ।
मुदितधरणिदेवश्रेणि विश्राणिताशी-
श्चिरमवतु विशाखो मेदिनीं मेदुरश्रीः ।। 51

इति श्रीविशाखतुलाभारप्रबन्धे उत्तरभागः ।

रचितो राजराजेन
चरणाम्बुजसेविना ।
श्रीविशाखतुलाभार-
प्रबन्धोऽयं मुदेऽस्तु वः ।।

।। शुभम ।।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

श्रीनारायणविजयो नाम

संस्कृतमहाकाव्यम्

डो. के. विजयन्

गुरुणा श्रीनारायणेन प्रचारितो धर्मः सर्वलोकसमादरणीयः सन् विराजते । सः स्वरूपतः सार्वलौकिकसौभ्रात्रसन्दायकः सर्वलोकानुग्राहकश्च भवति । तथापि केरलीयस्य अस्य मुनिपुङ्गवस्य सिद्धान्ताः उपदेशाश्च केरलाद् बहिः भारत एव सर्वत्र न प्रचारं गता इति दृश्यन्ते । का वा कथा समस्तस्यापि विश्वस्य ? अत एव महाकाव्यकारेण प्रोफसर् बालरामपणिक्कर् महोदयेन श्रीनारायणगुरोः पावनी महती कथा अखिललोकासेव्यत्वरूपेणास्मिन् काव्ये उपगुम्फिता ।

काव्येऽस्मिन् सार्धसहस्रश्लोकोद्ग्रथिता एकविंशतिसर्गाः सन्ति । तत्र प्रथमे सर्गे एकपञ्चाशच्छ्लोकैः गुरुपित्रोरास्थानभूतां पुण्यां स्यानन्दूरपुरीं, तस्या उपकण्ठे विराजमानं चेम्पलन्तीति विश्रुतं मनोहरं ग्रामरत्नं, तत्र विद्यमानं मणक्कल् इति प्रथितं देवालयं, तमुत्तरेण वर्तमानं वयल्वाराभिधा गुरुगेहं, तत्र समुद्भूतं गुरुतातं गुणवत्तरं भिषग्वरं कृष्णनामानं च अनतिविस्तृतया रीत्या विवृणोति काव्यकारः ।

द्वितीयः सर्गः श्रीनारायणगुरोर्जननं विद्याभ्यासं चाधिकृत्य प्रवर्तते । सर्गेऽस्मिन् चतुःपञ्चाशच्छ्लोकाः विद्यन्ते । सुमनोरमयोः शब्दार्थयोः चारुतरस्य सन्निवेशस्य निदर्शकोऽयं सर्गः । वयल्वारकुटुम्बिनी कुट्टियम्बा पञ्चपञ्चाशोत्तराष्टशताधिकसहस्रतमे क्रैस्तवाब्दे श्रावणमासि शततारानक्षत्रे सकलजनामोदकरं लोकस्थितिकर्तारं कुमारं प्रासूत । प्रसवकाले गर्भिण्याः शुश्रूषार्थं सूतिगृहे

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

स्थिताः स्त्रियः शोभनैः महापुरुषलक्षणैः समन्वितं, सूर्यमिव तेजांसि प्रसारयन्तं, प्रसवकालसाधारणं शिशुसहजं क्रन्दनादिकमन्तरा शयानं, मन्दस्मितमनोहरमुखाम्बुजं बालं पुनः पुनरीक्षित्वा तस्यैश्वरं भावं गृहीतवत्य इव तं भक्तिपूर्वं ववन्दिरे—

सुलक्षणं सूर्यमिव ज्वलन्तं
सुशान्तमानन्दकरं कुमारम् ।
स्मेराननं तत्र समीक्ष्य भक्त्या
ववन्दिरे सूतिगृहस्थनार्यः ।।

वराङ्गरूपोपेतो युवा श्रीनारायणः सिंहसंहनन एवासीदिति चतुर्भिः श्लोकैः वर्ण्यते—

सुवर्णवर्णं सुविभक्तगात्र–
माजानुबाहुं विशदोन्नतासम् ।
विशालभालं कमलायताक्ष–
मुत्तुङ्गनासं सुमनोहरास्यम् ।।

कपोतशब्दं करुणाकटाक्षं
सुशान्तगम्भीरमनोज्ञभावम् ।
दयावधानाश्रितमन्दहासं
दीनानुकम्पातरलान्तरङ्गम् ।।

शुचिव्रतं साधुनिषेवमाणं
मिताशनं मौनधनातिलुब्धम् ।
यमादिसौहार्दनिबद्धचित्तं
शमादिसम्पादनमुख्यलक्ष्यम् ।।

विविक्तसेवानिरतं सदापि
विशिष्टकार्यान्तरबद्धचित्तम् ।
तारुण्यपूर्णं तरुणार्कभासं
दृष्ट्वा जनो विस्मयमापदेनम् ।।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

अलौकिकैः अत्युन्नतैः एभिर्गुणैरलङ्कृतं तं युवानं दृष्ट्वा जनाः अद्भुतपरतन्त्राः अभवन् ।

प्रव्रज्यापरपर्यायं सर्वसङ्गपरित्यागं प्रस्तौति चतुष्षष्टिश्लोकयुक्ते तृतीयसर्गे । गुरु प्रव्रज्यातः निवर्तयितुं प्रयतन्ते पिता माटदेशिकः अन्ये बन्धुजनाश्च । तल्लाभाय प्रेषितः पुरोहितपुत्रो नीलः पाठशालामन्दिर-स्यान्तर्भागे दक्षिणामूर्तिमिवालौकिकेन कान्तिपूरेण शोभमानं श्रीनारायण-गुरुमपश्यत् । पितुः सन्देशं श्रुत्वा गुरुः स्मितार्द्रवदन एव केवलं संवृत्तः । तादृशं स्मितं मौनं च दृष्टवा, प्रायः लज्जाशीलानां यूनां एष स्वभाव इति कृत्वा निसर्गतः विरक्तं तं विवाहसक्तं मन्वानो नीलः पितुरन्ति-कमयात् । सुतः परिणयोन्मुखो जात इति ज्ञात्वा परं मुदितमानसः पिता तां मनोरमां वार्तां मातुलाय श्रीकृष्णवैद्याय निवेदितवान् । अथ बन्धुभिः सह मुहूर्तं विधिवत् निश्चित्य सः मातुलः विवाहोत्सवसामग्रीं आशु सम्बभार । तस्मिन् काले केरलेषु प्रचलितं कञ्चिदाचारमनुसृत्य विवाहदिने गुरोर्बान्धवाः तस्य भगिनीं सपरिवारां पुरस्कृत्य वधूगृहम-गच्छन् । परित्यज्य सर्वं व्रजितुमवसरं प्रतीक्षमाणः गुरुः सर्वेषु विवाहानुबन्धिभिः श्रमैः तान्ततामुपगतेषु सत्सु शब्दमकुर्वन् मन्दमुत्थाय गृहं परित्यज्य स्वकुटुम्बस्य परदेवतालयं गत्वा ध्याननिरतः चिरमतिष्ठत्। अथ गुरुः देवालयपुरोभुवं प्राप्य मनसा इत्थं यात्रामन्त्रणं व्यधात्— "हे महेश्वरि, बान्धवाः मां गृहे बन्धुमिच्छन्ति । तदहं तानद्य त्यजामि । अधर्माभिहतान् तप्ताम्बुपायिनः लोकान् सेवितुमितो यामि । मामनु-मन्यस्व । मातरं पितरं मातुलं बान्धवांश्चाहमापृच्छे । यूयं मम चेष्टितं क्षमध्वम् ।" विशयलेशमन्तरा कृत्यं स्वकीयं विनिश्चित्य संयमी स गुरुः सत्वरमेव परिसरमतिक्रम्य ययौ ।

•

मातुलोपदेशनाम्नि चतुर्थे सर्गे चतुःपञ्चाशच्छ्लोकाः सन्ति । तत्रागतं गुरुं कश्चन जनः मङ्गलवाद्यध्वनिपूरितपुराः भान्तः तत्र रम्यां

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

शिबिकामारोप्य सतोषं समाययुः । अथ मुहूर्ते समायाते पाणिग्रहं कारयितुं पिता पुत्रं आह्वयत् । पितुः प्रवृत्तं मधुरं तदाह्वानम् आवृत्त-मपि उत्तररहितं सत् समस्तान् सम्भ्रान्तचित्तान् अकरोत् । ततः तत्र सर्वत्रापि वरं गुरुमन्वेष्टुं प्रवृत्ता जनाः प्रव्रजितं तं वनान्तर्भागे ददृशुः । अनुयातान् दूरे विनिवेशितान् विधाय मातुलः प्रेमाद्रचित्तः शीघ्रं तं प्राप्य गृहं प्रत्यागन्तुमर्थयामास । प्रशान्तो गुरुः मञ्जुलमन्दहासः सन एवमवदत्—"गुरो, ममापराधं क्षमस्व । कार्यान्तरतत्परोऽस्मि । अह-मिदानीमेवेतो देशानन्यान् द्रष्टुं गच्छामि । लोकस्थितिं सम्यगवेक्ष्य पश्चात् तपोभिः सर्वार्तिहन्तारं परिपूतमार्गं यावदवैमि ।" अथ स गुरुः अत्युज्ज्वलकान्तिपूरैः दिशः परिपूरयन् पूर्वाद्रिकूटान् सूर्य इव तान् विहाय जगाम ।

षोडशोत्तरशतैः श्लोकैः युक्तं भवति तीर्थयात्रा नाम पञ्चमः सर्गः। प्रव्रज्यानन्तरं श्रीनारायणगुरुः तीर्थाटनाय कृतमतिः सन् कन्याकुमारीति प्रसिद्धं तीर्थं प्राप । स तत्र पावने पुरातने मन्दिरे भगवतीम् आपन्निवा-रिणीं दुर्गां ध्यानप्रधानया प्रक्रियया उपासीनः कांश्चिद् दिवसान् अवसत्। ततः गुरुः हिमवतः तुङ्गे शृङ्गे विलसन्तं बदरीनाथमीश्वरम् अन्तः विभाव्य उदङ्मुखः सन् प्रतस्थे । व्रती सः मार्गे दृष्टस्य मरुत्वाख्यस्य शैलस्य रम्यामधित्यकां प्राप्य तत्रावसत् । कठोरातपेन क्लान्तं गुरोः शरीरं दृष्ट्वा नागराजः दयार्द्रचित्तः सन् गुरोः समीपमागत्य स्वभुजा-जालं विततं कुर्वन् गुरुमातपाद् अरक्षत् । (गुरुणैवेदं पश्चात् कथित-मिति श्रूयते ।) तत असौ विश्रुतं शुचीन्द्रं प्राप्य स्थाणुमूर्तिं उपस्थाप्य स्यानन्दूरपुरं ययौ । तत्र सः तपस्वी योगपथे यान्तं शान्तं षण्मुखसेविनं बालभट्टारकाख्यं ऋषिमैक्षत । जगत्तन्त्ररहस्यज्ञः सः ज्येष्ठः भ्राता इव तमग्रहीत् । उभौ तौ बालवने (तैक्काट्) वसन्तं आर्याख्यं मुनिसत्तमं द्रष्टुं गतौ । प्रीतो मुनिः तपसा सञ्चितं सर्वं, लोकानुग्रहपरेषु कर्मसु आत्मानं व्यापारयितुमुत्सुकाय गुरवे श्रीनारायणाय दातुं निश्चितवान्। अथ दिव्ये मुहूर्ते सम्प्राप्ते सः ऋषीश्वरः तस्मै ब्रह्मविद्यामुपादिशत् ।

CC-0 Agamnigam Digital Preservation Foundation,Chandigarh.Funding by IKS-MoE-2025-Grant

Gandhi Memorial College Of Education Bantalab Jammu

अथ गुरुः दिव्यानि केरलीयानि पुण्यस्थलानि देवमन्दिराणि च प्राप्य तत्र तत्र समुचितामुपासनां भक्तिपूर्वमकरोत् । ततः परमयं सह्याद्रिमुल्लङ्घ्य प्रयाणं कृतवान् । मधुराधिष्ठितां त्रिपुरेश्वरीं मीनाक्षीं मनोहरैः स्तोत्रपुष्पैः अपूजयत् । तत्र एव सुन्दरेश्वरसन्निधौ शतशः प्रणामं कृत्वा आत्मानं पूतमातन्वन् ततः विनिर्ययौ ।

